## ।। अथ द्विचत्वारिंशोऽध्याय: ।। Chapter-42

वसिष्ठ उवाच :-ततो गच्छेन्नृपश्रेष्ठ सर्वसिद्धिमाश्रमम् ।।
सुचिरं द्वादशादित्यैर्यत्र तेपे महत्तप: ।। १

पुरा ह्यर्जितस्तपस्तप्तं काश्यपेन महात्मना ।।
चाक्षुषस्यांतरेसृष्टौ सुराणां जननेच्छया ।। २

तुषिता नाम वै देवाश्चाक्षुषस्यांतरेऽभवन् ।।
प्राप्ते वैवस्वते देवा आदित्यास्ते सुरा: स्मृता ।। ३

कश्यपस्य कुले जाता महात्मानो महौजस: ।।
श्रीमाले ते यतात्मानस्तेपिरे परमं तप: ।। ४

प्रत्यक्षोऽभूत्तदा तेषां ब्रह्मा लोकपितामह: ।।
आगत्याश्रममाकाशादादित्यानिदमब्रवीत् ।। ५

किमर्थं तप्यते वत्सा भवद्भि: सहितैरिह ।।
अनेन तपसा दवं स्वर्गं गच्छत मा चिरम् ।। ६

अदितेर्जन्म संप्राप्य कश्यपाज्जगतां पितु: ।।
आदित्यास्ते न विख्यात लोके यूयं भविष्यथ[1] ।। ७

-0-0-

[1] ई ए भविष्यथ

देवाऊचुः दत्तं देव त्वया राज्यं त्रैलोक्यस्य सुदुर्लभम्।
मनोर्वैवस्वतस्यैकमंतरं यावदव्ययम्। ८

आश्रमे य इहास्माकं श्रद्धालुर्विवसेन्नरः ।।
उपोष्य रजनीमेकां स स्वर्गान्न पतेत्क्वचित् ।। ९

अत्र धेनुप्रदानं ये कुर्वंति श्रद्धयाविभो ।।
ते पीयूषभुजां मध्ये निवसंतु शतं समाः ।। १०

देवानुद्दिश्य ये विप्रा हविर्होष्यंति पावके ।।
आदित्यांश्च माश्रित्य[1] चिरं क्रीडंतु[2] ते दिवि ।। ११

ब्रह्मोवाच :- एवमस्तु सुरश्रेष्ठा दत्तं वः प्रार्थितं मया ।।
अशांशेनात्तीयत्रि दिवं गच्छंतु माचिरम्।। १२

इत्यादिश्य सुरैः सार्द्धं तैः सर्वैस्तीर्थवासिभिः ।।
अभ्यर्षिचत्ततो लोके ब्रह्मा लोकपितामहः ।। १३

आदित्या नाम ते देवा ययुः स्वर्गं तपोबलात् ।।
त एवाद्यपि लोकानां शासितारो नरेश्वर ।। १४

-0-0-

१ ए श्रित्या
२ ए क्रिडं

श्रीमालेत्रावतीर्याशु: सिद्धिं यच्छंति देहिनाम् ।।
द्वादशादित्यमाहात्म्यं य इदं श्रृणुयान्नर: ।। १५
तस्य कांतिं श्रियं कीर्तिं तुष्टा यच्छंति देवता: ।।

इति श्री स्कंदपुराणे श्रीमालमाहात्म्ये द्वादशादित्य महात्म्यंनाम द्विचत्वारिंशोऽध्याय: ।। ४२ ।।